द्वितीय-सत्रीय परीक्षा

आदर्श प्रश्न पत्रम्

2021-2022

कक्षा-नवमी

विषय : संस्कृतम्

समय : होरात्रयम् पूर्णाङ्क : 50

प्र० 1. **अधोलिखितं गद्यांश पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत-**

परेषाम् उपकार: परोपकार: वर्तते। परोपकार: एक: महान् गुण: अस्ति। परोपकार भावना अस्यां प्रकृतौ सर्वत्र वर्तते। वृक्षा: स्वयं फलं न खादन्ति। नद्य: परोपकारार्थमेव वहन्ति। गाव: स्वयं दुग्धं न पिबन्ति। सर्वं जगत् परोपकारार्थं वर्तते। महापुरुषा: स्वार्थं विहाय सर्वप्राणिभ्य: कार्यं कुर्वन्ति। महाराज: शिवि: कपोतरक्षार्थं स्वकीयं मासं श्येनाय प्रददौ। महर्षि: दधीचि: देवहिताय स्वबलिदानं कृतवान्। वस्तुत: परोपकार: पुण्याय पापाय परपीडनम्।

(अ) एकापदेन उत्तरत—

(1) परोपकार भावना सर्वत्र कुत्र वर्तते ?

(2) नद्य: किमर्थं वहन्ति ?

(आ) पूर्ण वाक्येन उत्तरत—

(3) महापुरुषा: कार्यं कथं कुर्वन्ति ?

(इ) निर्देशानुसार उत्तरत—

(4) 'स्वकीयम्'-अस्य विलोम शब्द: अत्र गद्यांशे क: प्रयुक्त: ?



Downloaded from cclchapter.com

(5) 'खादन्ति'-क्रिया-पदस्य पुरुषं वचनं च लिखत ? (1×5=5)

प्र० 2. **मञ्जूषातः उचित पदानि विचित्य पत्रे रिक्त स्थानानि पूरयन्तु—**

[पित्रोः, त्वम्, संस्कृत-विषये, छात्रावासतः, अनुजः, आशीषः, संस्कृतस्य, शोभनः, तव, प्राप्ताः]

(i) ...............प्रिय (ii) ...............रमेशः सस्नेहम् (iii) .......... ।

(iv) ह्यः ............... पत्रं प्राप्तवान्। परीक्षापरिणामः (v) ............... अस्ति, परं (vi) ..............., भवतान्यूना अंकाः (vii) ............... इति सखेदं मया अधीतम्। (viii) ............... प्रतिदिनं प्रातः काले उत्थाय (ix) ...............अभ्यासं कुरु । संस्कृत अध्यापकं च पुनः पुनः प्रश्नान् पृच्छ। अभ्यासेन एव सर्वाणि कार्याणि सिद्धयन्ति। (x) ............... चरणयोः सादरं प्रणामः। भवतः अग्रजः रामः। (½×10=5)

प्र० 3. **अधोलिखित विषयेषु एकं विषयम् अधिकृत्य अनुच्छेदं (निबधं) लिखत।**

(1) विजयादशमी

(2) मम प्रियः अध्यापकः

(3) पर्यावरणम् (5×1=5)

प्र० 4. **निम्नलिखित वर्णानां समुचितं उच्चारणस्थानं कोष्ठात् चित्वा लिखत।**

(क) ओ ............... (तालु/कण्ठोष्ठ)

(ख) घ् ............... (कण्ठ/मूर्धा)

(ग) भ् ............... (ओष्ठ/कण्ठ)

(घ) ल् ............... (दन्त/ओष्ठ)



Downloaded from cclchapter.com

(ङ) य् ............... (तालु/नासिका)

(च) व् ............... (दन्तः/दन्तोष्ठः)

(छ) म् ............... (ओष्ठ/तालु)

(ज) अ ............... (कण्ठ/ओष्ठ) (½×6=3)

**प्र० 5.** **अधोलिखित पदेषु चतुर्ण्णां सन्धि विच्छेदं वा कुरुत—**

सज्जनः, जगदीशः, अत्रैव, सु+आगतम्, सूर्य+उदयः, उल्लेखः,(½×4=2)

**प्र० 6.** **कोष्ठकेषु प्रदत्तधातुषु समुचितं पुरुषं वचनं च प्रयुज्य कानिचन् त्रीणि रिक्तस्थानानि पूरयत—**

(क) अहम् रामायणं ............... । (पठ् लट्लकारः)

(ख) राधा उच्चस्वरेण ............... । (हस् लङ् लकारः)

(ग) त्वम् कुत्र ............... ? (गम् लृट् लकार)

(घ) छात्राः कोलाहलं ............... । (कृ लट् लकार)

(ङ) तौ ............... । (खेल् लट् लकार) (1×3=3)

**प्र० 7.** **कोष्ठकेषु प्रदत्तशब्देषु विभक्तिं योजयित्वा कानिचत् त्रीणि रिक्तस्थानानि पूरयत—**

(क) ............... पत्राणि पतन्ति। (वृक्ष पञ्चमी)

(ख) ............... अपि तत्र गमिष्यामि। (अस्मद् प्रथमा)

(ग) ............... खेलति। (लता प्रथमा)

(घ) ............... पुस्तकं पठन्ति। (तद् प्रथमा)

(ङ) ............... सह राधा गच्छति। (राम तृतीया) (1×3=3)



Downloaded from cclchapter.com

प्र० 8. अधोलिखितेषु वाक्येषु प्रकृति-प्रत्ययोः संयोगेन कानिचन् चत्वारि रिक्तस्थानानि पूरयत्—

(क) रामः ................ खादति। (क्रीड + शतृ)

(ख) सर्वदा सत्यं ................ । (वद् + अनीयर्)

(ग) सः ................ पठति। (चल् + क्त्वा)

(घ) त्वं पुराणं ................ इच्छसि। (पठ् + तुमुन्)

(ङ) रामः ग्रामं ................ । (गतवान्)

(च) विद्यालयम् ................ स्वच्छतां करोमि। (आ + गम् + ल्यप्)

(1×4=4)

प्र० 9. अधोलिखितयोः गद्यांशयोः कस्यचिद् एकस्य हिन्दीभाषायाम् अनुवादः (1×3=3)

(क) जीर्णधनः अवदत्—"भोः श्रेष्ठिन्! नास्ति दोषस्ते, यदि मूषकैः भक्षिता। ईदृशः एव अयं संसारः। न किञ्चिदत्र शाश्वतमस्ति। परमहं नद्यां स्नानार्थं गमिष्यामि। तत् त्वम् आत्मीयं एनं शिशुं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय" इति।

(ख) भो नरोत्तम्! नाऽहं जाने यत् कोऽस्ति भवान्। परन्तु भवद्भिः उन्मीलितं मे नयनयुगलम। तपोमात्रेण विद्यामवाप्तुं प्रयतमानः अहमपि सिकताभिरेव सेतुनिर्माणप्रयासं करोमि। तदिदानीं विद्याध्ययनाय गुरुकुलमेव गच्छामि। (सप्रणामं गच्छति)



Downloaded from cclchapter.com

प्र० 10. अधोलिखित पद्यांशयोः एकस्य हिन्दी भाषायाम् अनुवादः क्रियताम्—

(क) विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।

यदि विद्या वशे स्युस्ते, सेतुरेष तथा मम।।

(ख) परिधानैरलङ्कारैः भूषितोऽपि न शोभते।

नरो निर्मणि भोगीव सभायां यदि वा गृहे।। (1×3=3)

प्र० 11. अधोलिखितं पद्याशं पठित्वा निर्देशानुसारम् केषाञ्चन चतुर्णाम् उत्तराणि लिखत—

यत्र देशेऽथवा स्थाने भोगा भुक्ताः स्ववीर्यतः।

तस्मिन् विभवहीनो यो वसेत् स पुरुषाधमः।।

(क) एकपदेन उत्तरत—

(1) स्ववीर्यतः के भुक्ताः ?

(2) विभवहीनः कः कथितः ?

(ख) पूर्णवाक्येन उत्तरत—

(3) अत्र पुरुषाधमः कः कथितः ?

(ग) निर्देशानुसारम् उत्तरत—

(4) 'पुरुषोत्तमः इत्यस्य प्रयुक्तं विलोमपदं किम् ?

(5) विभवेन हीनः इत्यस्या समस्तपदं लिखत ? (1×4=4)



Downloaded from cclchapter.com

प्र० 12. **अधोलिखतं गद्यांशं पठित्वा निर्देशानुसारं केषाञ्चन चतुर्णां प्रश्नानाम् उत्तराणि लिखित—**

तस्य च गृहे लौहघटिता पूर्व पुरुषोपार्जिता तुलासीत्। तां च कस्याचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच-''भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला।'' स आह-''भोः! नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता'' इति।

(क) एकपदेन उत्तरत—

(1) लौहघटिता का आसीत् ?

(2) तुला कैः भक्षिता ?

(ख) पूर्णवाक्येन उत्तरत—

(3) श्रेष्ठी वणिक्पुत्रं किम् आह ?

(ग) निर्देशानुसार उत्तरत—

(4) 'मूषकैर्भक्षिता' अत्र सन्धिच्छेदं कुरुत।

(5) 'सुचिरं कालं-अत्र विशेषणपदं किम् ? (1×4=4)

प्र० 13. **यथानिर्दिष्ट कुरुत—**

(क) भिन्नवर्गीयं पदं चिनुत—

(1) अधिरोढुम्, गन्तुम्, सेतुम्, निर्मातुम्।

(2) निः श्वस्य, चिन्तय, विमृश्य, उपेत्य।

(3) विश्वसिमि, पश्यामि, करिष्यामि, अभिलषामि।

(4) तपोभिः, दुर्बुद्धिः, सिकताभिः, कुटुम्बिभिः। (2×3=6)



Downloaded from cclchapter.com

(ख) उपसर्गान पृथक्कृत्वा लिखत्—

(1) प्रभवति- ..................

(2) उपलभ्यते- ................

(3) निवसन्ति- .................

(4) वितरन्ति- ................

(ग) समस्तपदानि लिखत—

(1) अक्षराणां ज्ञानम्- ................

(2) सिकतायाः सेतुः- ................

(3) पितुः चरणैः- ................

(4) विद्यायाः अभ्यासः- ..............



Downloaded from cclchapter.com